योजनं तत्रातिवाहादिनेति शेषः। अत्रैव विषये च्यवनः "प्राजापत्यद्वयं गोहत्याप्रायश्चित्तं रोधनबन्धनयोक्त्रबधे पादवृद्ध्या नखानि लोमानि शिखावर्जं सशिखं वपनं त्रिषवणं गवानुगमनं सहशयनं सुमहत्तृणानि रथ्यासु चारयेत् व्रतान्ते ब्राह्मणभोजनमिति"। रोधनबन्धनयोक्त्रबध इत्यादेरयमर्थः रोधनिमित्तकबधे प्राजापत्यस्य पादः प्रायश्चित्तं नखच्छेदनमात्रम्। बन्धननिमित्तबधे प्राजापत्यस्य द्वौ पादौ नखानां लोम्नाञ्च छेदनम्। योक्त्रनिमित्ते च बधे प्राजापत्यपादत्रयं नखलोमशिखावर्जकेशच्छेदनञ्च। दण्डादिप्रहारबधे सम्पूर्णं प्राजापत्यम् नखलोमकेशशिखाच्छेदनञ्च इति। एतद्विषय एव मिताक्षराधृतं संवर्त्तवचनं तदैकवाक्यत्वात् तद्यथा "पादेऽङ्गलोमवपनं द्विपादे श्मश्रुणोऽपि च। त्रिपादे च शिखावर्जं सशिखन्तु निपातने"। अत्र प्राजापत्यस्य पादादित्वे किं मानमिति चेत्। पराशरवचनम् "रोधने तु चरेत् पादं बन्धने चार्द्धमेव हि। योजने पादहीनं स्यात् प्राजापत्यं निपातने"। "कृच्छ्रमज्ञानताड़ने" इति वार्हस्पत्यात्। दण्डोऽत्र हस्तप्रमाणो ग्राह्यः। तदधिके तु द्विगुणप्रायश्चित्तविधानात्। यथा अङ्गिराः "अङ्गुष्ठमात्रः स्थौल्येन बाहुमात्रः प्रमाणतः। सार्द्रश्च सपलाशश्च दण्ड इत्यभिधीयते"। "अस्मादूर्द्ध्वं प्रहारेण यदि गां विनिपातयेत्। द्विगुणन्तु भवेत्तत्र प्रायश्चित्तमिति स्थितिः"। सपलाशः सपत्रः। एतद्वचनविषय एव च्यवनोक्तप्राजापत्यद्वयमिति एतच्चाज्ञानतः यथा वृहस्पतिः "पादञ्चरेत् रोधबधे कृच्छ्रार्द्धं बन्धघातने। अतिवाहे च पादोनं कृच्छ्रमज्ञानताड़ने"। अज्ञानञ्च क्षीणायामक्षीणत्वभ्रमः। चैतन्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादादिकम्। यथा हारीतः "नासाच्छेदनदाहेषु कर्णच्छेदनबन्धने। अतिदोहातिवाहाभ्यां कृच्छ्रं चान्द्रायणं चरेत्" हत्वेति शेषः। कृच्छ्रं व्रतं तेन चान्द्रायणव्रतमित्यर्थः। इति शूलपाणिमहामहोपाध्यायाः। भवदेवभट्टैस्तु निपातने कूपावटादिषु इति व्याख्यातं तदपि युक्तं अन्यथा तत्र पातजनकभयादिदर्शकस्य प्रायश्चित्तस्यानध्यवसायापत्तेः। "शस्त्रादिना तु हत्वा गां मानवं व्रतमाचरेत्। रोधादिना त्वाङ्गिरसमापस्तम्बोक्तमेव चेति" वृहस्पत्युक्तं तत्र प्रथमादिपदानुपस्थितलोष्टलगुड़विषाग्न्यादीनां प्रायिकमृत्युफलानां ग्रहणम्। रोधादिनेति यथा कथञ्चिन्निमित्तमात्रस्य, बन्धादेरिति शूलपाणिव्याख्यान्तराच्च। तस्मान्निपातनपरम् उभयपरम्। एतच्च रात्रौ रक्षणार्थं रोधबन्धनव्यतिरिक्तविषयम्। "सायं संयमनार्थन्तु न दुष्येद्रोधबन्धयोः" इति अङ्गिरोवचनात् बन्धने मिताक्षरायां विशेषमाह व्यासः "न नारिकेलैर्न च शाणतालैर्न चापि मौञ्जैर्न च बन्धशृङ्खलैः। एतैस्तु गावो न हि बन्धनीया बद्ध्वा तु तिष्ठेत् परशुं गृहीत्वा। कुशैः काशैश्च बध्नीयात् स्थाने दोषविवर्जिते"। निमित्तिन्शब्दे वक्ष्यमाणे मन्यूत्पादनद्वारा २हनने च।

**निमित्तविद्** त्रि० निमित्तं शकुनं शुभाशुभसूचकं लक्षणं वेत्ति विद–क्विप्। निमित्तज्ञे दैवज्ञे हेमच०। निमित्तज्ञादयोऽप्यत्र। "निमित्तज्ञस्तपोधनः" रघुः।

**निमित्तिन्** त्रि० निमित्तमस्त्यस्य इनि। निमित्तयुक्ते १कार्ये प्रा०वि०उक्ते २वधकर्त्तृभेदे च यथा "कर्त्ता च पञ्चविधः कर्त्ता प्रयोजकोऽनुमन्ता अनुग्राहकोनिमित्ती चेति"। निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्वो न्यायमर्थयते तु यः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" तल्लक्षणं प्रा०वि० उक्तं "उद्देश्यत्वे सति हन्तुर्मन्यूत्पादको निमित्ती" इति मन्यूत्पादने निमित्तमाह तत्रैव वृद्धशा० "गोभूहिरण्यहरणे स्त्रीसम्बन्धकृतेऽपि च। यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम्" वृहस्पतिः "ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गोभूहिरण्यहरणे स्त्रीणां क्षेत्रगृहस्य च। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गुर्वर्थं पितृमात्रर्थमात्मार्थमथ वा पुनः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" षट्त्रिंशन्मतमिति कृत्वा पठितम् "आक्रोशितस्ताड़ितो वा धनैर्वा परिपीड़ितः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" अत्रोद्दिश्येति सर्वत्र कीर्त्तनात् उद्देशाभावे निमित्ततामात्रेण वधित्वं नास्ति अर्थादिहरणाक्रोशनताड़नादीनां मन्युकारणानामुपात्तत्वादेतेषामभावे धनाद्यर्थं वृक्षारोहणादिना ये म्रियन्ते (यदि मह्यं धनं न दास्यसि तदा वृक्षारोहणेन मरिष्यामीति) तत्र कीर्त्तनमात्रेण निमित्तवधो नास्ति तथा च पठन्ति "असत्वेन यः कश्चित् द्विजः प्राणान् परित्यजेत्। तस्यैव तद्भवेत् पापं न तु यं परिकीर्त्तयेत्" असत्त्वेनेति वाक्कृतादिसकलापराधसम्ब-